# सु-स्वागतम्

प्रस्तोता – सत्यव्रत पाण्डेयः प्राध्यापक महर्षि पाणिनि संस्कृत वैदिक विश्व विद्यालय उज्जैन

# (६४) स्थानलक्षणम्

स्थानं नामोपस्थितिः । यस्य हि देशे योऽनुष्ठीयते तत्पूर्वतने पदार्थे कृते स एव प्रथममुपस्थितो भवतीति युक्तं तस्य प्रथममनुष्ठानम् । अतएव साद्यस्क्रे अग्नीषोमीयसवनीयानुबन्ध्यानां सवनीयदेशे सहानुष्ठाने कर्तव्ये आदौ सवनीयपशोरनुष्ठानमितरयोः पश्चात्। तस्मिन्देशे आश्विनग्रहणानन्तरं सवनीयस्यैव प्रथममुपस्थितिः ।।६४।।

# (६५) साद्यस्क्रयागः

तथाहि ज्योतिष्टोमे त्रयः पशुयागाः । अग्नीषोमीयः सवनीय आनुबन्ध्यश्चेति । ते च भिन्नदेशाः । अग्नीषोमीय औपवसथ्येऽह्नि । सवनीयः सुत्याकाले । आनुबन्ध्यस्त्वन्ते । साद्यस्क्रो नाम सोमयाग-विशेषः । स चाव्यक्तत्वाद् ज्योतिष्टोमविकारः । अतस्ते त्रयोऽपि पशुयागाः साद्यस्क्रे चोदकप्राप्ताः । तेषां च तत्र साहित्यं श्रुतं 'सह पशूनालभेत' इति । तच्च साहित्यं सवनीयदेशे । तस्य प्रधान-प्रत्यासत्तेः । स्थानातिक्रमसाम्याच्च ।। ६५ ।।

# (६६) स्थानातिक्रमसाम्य

सवनीयदेशे ह्यनुष्ठानेऽग्नीषोमीयानुबन्ध्ययोः स्वस्वस्थानातिक्रमो भवति । अग्नीषोमीयदेशे त्वनुष्ठाने सवनीयस्य स्वस्थानातिक्रममात्रम्। अनुबन्ध्यस्य तु स्वस्थानातिक्रमः सवनीयस्थानातिक्रमश्च स्यात् । एवमनुबन्ध्यदेशेऽ ग्नीषोमीयस्य द्रष्टव्यः स्थानातिक्रमः ।।६६।।

# (६७) सवनीयस्य प्रथममनुष्ठानम्

तथा च सवनदेशे सर्वेषामनुष्ठाने कर्तव्ये सवनीयस्य प्रथममनुष्ठानम् । आश्विनग्रहणानन्तरं हि स यस्य प्रथममनुष्ठानं सवनीयदेशः । तथा च प्रकृतावाश्विनग्रहं कृत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोतीत्याश्विनग्रहणानन्तरं सवनीयो विहित इति साद्यस्क्रेऽप्याश्विनग्रहणे कृते सवनीय एवोपस्थितो भवति । अतो युक्तं तस्य स्थानात्प्रथममनुष्ठानमितरयोस्तु पश्चादित्युक्तम् ।।६७।।

# (६८) मुख्यक्रमलक्षणम्

प्रधानक्रमेण योऽङ्गानां क्रमः आश्रीयते स मुख्यः क्रमः । येन हि क्रमेण प्रधानानि क्रियन्ते तेनैव क्रमेण तेषामङ्गान्यनुष्ठीयन्ते चेत् तदा सर्वेषामङ्गानां स्वैः स्वैः प्रधानैस्तुल्यं व्यवधानं भवति । व्युत्क्रमेणानुष्ठाने केषाञ्चिदङ्गानां स्वैः प्रधानैरत्यन्तमव्यवधानं केषाञ्चिदत्यन्तं व्यवधानं स्यात् । तच्चायुक्तम् । प्रयोगविध्यवगतसाहित्यबाधापत्तेः ।अतःप्रधानक्रमोऽपि अङ्गक्रमे हेतुः । अतएव प्रयाजशेषेणादावाग्नेयहविषोऽभिघारणं पश्चादैन्द्रस्य दध्नः । आग्नेयैन्द्रयागयोः पौर्वापर्यात् । एवं च द्वयोर्द्वयोरभिघारणयोः स्वस्वप्रधानेन तुल्यमेकान्तरितं व्यवधानम् ।व्युत्क्रमेणाघारे त्वाग्नेयहविरभिघारणाग्नेययागयोरत्यन्तमव्यवधानम् । ऐन्द्रदध्यभिघारणैन्द्रयागयोर्यन्तरितं व्यवधानं तच्चायुक्तमित्युक्तमेव ।। ६८ ।।

# (६९) मुख्यक्रमः पाठक्रमाद्दुर्बलः

स च मुख्यः क्रमः पाठक्रमादुर्बलः । मुख्यक्रमो हि प्रमाणान्तरसापेक्षप्रधानक्रमप्रतिपत्तिसापेक्षतया विलम्बितप्रतिपत्तिकः । पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममात्रसापेक्षतया न तथेति बलवान् ।। ६९ ।।

# (७०) मुख्यक्रमः प्रवृत्तिक्रमाद्बलवान्

स चायं मुख्यः क्रमः प्रवृत्तिक्रमाच्च बलवान् ।
प्रवृत्तिक्रमे हि बहूनामङ्गानां प्रधानविप्रकर्षात् ।
मुख्यक्रमे तु सन्निकर्षात् ।।७०।।

# (७१) प्रवृत्तिक्रमलक्षणम्

सहप्रयुज्यमानेषु प्रधानेषु सन्निपातिनामङ्गानामावृत्त्यानुष्ठाने कर्तव्ये द्वितीया-दिपदार्थानां प्रथमानुष्ठितपदार्थक्रमाद्यः क्रमः स प्रवृत्तिक्रमः ।।७१।।

# (७२) प्रवृत्तिक्रमस्योदाहरणम्

यथा प्राजापत्यपश्वङ्गेषु । प्राजापत्या हि 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीति वाक्येन तृतीयानिर्देशात्सेतिकर्त्तव्यताका एककालत्वेन विहिताः । अतस्तेषां तदङ्गानां चोपाकरणनियोजनप्रभृतीनां साहित्यं सम्पाद्यम् । तच्च प्राजापत्यपशूनां सम्प्रतिपन्नदेवताकत्वेन युगपदनुष्ठानादुपपद्यते । तदङ्गानां चोपाकरणादीनां युगपदनुष्ठानमशक्यम् । अतस्तेषां साहित्यमव्यवहितानुष्ठानात्सम्पाद्यम् । तच्चैकस्योपाकरणं विधायापरस्योपाकरणं विधेयम् । एवं नियोजनादिकमपि । तथाच प्राजापत्येषु कस्माच्चित्पशोरारभ्य एकं पदार्थं सर्वत्रानुष्ठाय द्वितीयादिपदार्थः तेनैव क्रमेणानुष्ठेयः स प्रवृत्तिक्रमः ।।७२।।

# (७३) प्रवृत्तिक्रमस्य दुर्बलत्वम्

सोऽयं श्रुत्यादिभ्यो दुर्बलः । तदेवं सङ्क्षेपतो निरूपितः षड्विधक्रमनिरूपणेन प्रयोगविधिः ।।७३।।

# धन्यवाद